# शब्दविमर्शः - खच्प्रत्ययान्तशब्दानामवलोकनम् ।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

## 1. वशंवदः ।

प्रायेण यदात्महितं मन्वते तदेव जनाः कुर्वन्ति। इतिकर्तव्यतामूढाः जनाः किं कुर्युः ? क्वचिदन्तरालपतिताश्च सम्पत्स्यन्ते। यथा रामं हा सीते हा लक्ष्मणेत्याक्रोशन्तमाकर्ण्य लक्ष्मणं रामान्तिकं प्रस्थापयति सीता। लक्ष्मणस्तु राक्षसमायेदमिति जानन्नपि सीतां प्रत्याययितुन्नाशकत्। रामादिष्टोऽस्ति सीतापरित्राणार्थं मैनां हित्वान्यत्र याहीति। कतरोऽयमिदानीमादेशोऽनुसर्तव्यः। अन्तरालपतितः। अन्यत्रापि श्रूयतां मुरारिवर्णितम् - दृष्ट्वा राघवमेकराक्षसवनस्वच्छन्ददावानलं जानक्यां निजवल्लभस्य परमं प्रेमाणमालोक्य च। काङ्क्षन्ती मुहुरात्मपक्षविजयं भङ्गञ्च मुग्धा मुहुर्ध्यायन्ती ध्रुवमन्तरालपतिता मन्दोदरी वर्तते।। (अनर्घराघवम् 6.27)। राक्षसरूपमरण्यं स्वपौरुषाग्निना दहन्तं श्रीराममवेक्ष्यात्मपक्षस्य रावणसैन्यस्य विजयं कॉक्षन्ती आस्ते। ननु जित्वा किम् ? रावणस्तु जानक्यामनुरक्तः इति विचिन्तयन्ती निरालम्बा सती स्वपक्षस्य पराजय एवास्तु इति च अन्यतरपक्षस्वीकरणे कातरा अन्तरालपतिता वर्तत इत्यर्थः।

अन्योऽप्येवं सन्दर्भः योऽयमनर्थपरम्पराप्रभवो भविष्यति। यथा रामेण लक्ष्मणेन च सोपहासं निरस्ता शूर्पणखा पुनरपि लक्ष्मणमुपेत्य वदति - सौमित्रे मामुपायंस्थाः कम्रामिच्छुर्वशंवदाम्। त्वद्भोगीनां सहचरीमशङ्कः पुरुषायुषम्।। (भट्टिकाव्यम् 4.20)। हे सौमित्रे निर्विकल्पः सन् कामिनीं त्वद्वशंवदां त्वच्छरीराय हितां पुरुषस्यायुर्यावत् सहगामिनीं मां परिणय। किमिदं चर्वितचर्वणम् ? असकृदुक्तोऽयं कथांश इति चेत्कथाकथने नास्माकं तात्पर्यम्। प्रत्युत कथामुखेन भाषाध्ययनाय प्रवृत्ताः। वशंवदशब्दोऽत्र विवरीष्यमाणः। 'प्रियवशेवदः खच्' (3.2.38) इति सूत्रेण प्रिय वश इत्येतयोः कर्मणोरुपपदयोः वद व्यक्तायां वाचि (भ्वा.1009) इत्यस्माद्धातोः खच्प्रत्ययो विहितः। तयोः प्रियशब्दे उपपदे प्रियंवद इत्येतद्रूपं पूर्वतनलेखे यथाशक्ति वर्णितम्। प्रकृते वशंवदशब्दोऽनुवर्तते। पुरुषस्यायुर्यावत् त्वद्भोगीनां मामुपायंस्थाः इति खलु शूर्पणखा वदति। कथमेतद्युज्यते ? शतायुर्वै पुरुष इत्युक्तेः यावज्जीवेद्वर्षशतं जीवेत्। तत्र बालत्ववृद्धत्वयोः पुरुषः इन्द्रियसुखनिरपेक्षः एकत्र क्रीडारतः अपरत्र क्षीणायुश्च कालं यापयति। कथं तर्हि शरीरं शतं समाः भोगायतनं भवितुमर्हतीति चेन्न खलु यावज्जीवं भोगवृत्तिः। अन्यथापि सहचरीरूपेण वर्तिष्य इति खलु सा अवोचत्। अये मा तस्या वाक्षु मुह्यत्। सा राक्षसी केवलं ग्राम्यसुखमिच्छन्ती तात्कालिकीं स्वाभिलाषापूर्तिं मुद्दिश्यैवमवोचत्। वस्तुतो न कदाचिदेवं चिन्तयेत् यत्पुरुषायुर्यावदिन्द्रियारामेऽभिरामाभी रमाभी रमामह इति। अत एव खलु चण्डालकूपमिव परिहृत्य दूरतरं तरुण्य इति हरिराह। पश्चाज्जीवति जर्ज्जरदेहे वार्ता कोऽपि न पृच्छति गेहे इति शङ्करभगवत्पादवचनं स्मरेम। अतो हि मार्गान्तरमन्विष्यतां यस्मिन्नाश्रिते पुरुषायुर्यावत् सुखेन वस्तुं शक्यते। किं तत्। सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ। तयोस्तु कर्म सन्न्यासात् कर्मयोगी विशिष्यते। एतद्द्रढयति श्रुतिः कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे इति।

तदास्तां वशंवदशब्दमुद्धर्तुकामो भवानन्यवशंवद इव विषयान्तरमपसरति। अस्तु तर्हि उदाहरणान्तरं श्रूयताम् - त्वया प्रियाप्रेमवशंवदेन शतं व्यतीये सुरतादृतूनाम्। रहः स्थितेन त्वदवीक्षणार्तो दैन्यं परं प्राप सुरैः सुरेन्द्रः।। (कुमारसम्भवम् 9.8)। प्रेमातिरेकेण पार्वतीवशीभूतः रहसि सुरतासक्तो भगवान् ऋतूनां शतं व्यतीयाय। अत एव भगवद्दर्शनविरहेण सुरैः सहितः सुरेन्द्रः परं दैन्यभावं प्रापेत्याशयः। पद्येऽस्मिन् प्रियाप्रेमवशंवदेनेति

वशंवदशब्दमद्राक्ष्म। वशमनुकूलं वदतीति वशंवद इति न केवलमस्यार्थः। प्रत्युत वशीभूत इत्यर्थः। कथमेतद्युज्यते। यस्तु प्रियं वदति तच्छीलं तद्धर्मा तत्साधुकारि वा स खलु प्रियंवदः। तद्वत् यो वा वशमनुकूलं श्लक्ष्णं मधुरं वा वदति तच्छीलं तद्धर्मा तत्साधुकारि वा स खलु वशंवदः। कथं तर्हि वशीभूतसमार्थकत्वमत्र कल्पितम्। अभिव्यक्तौ साधनं वाक्। अत्र वशीभूततामभिव्यञ्जयितुं वदधात्वर्थाभिव्यञ्जितं वाग्व्यापारं आलक्षयामः। अथवास्तु वशीभूततां भावहावादिभिरभिव्यञ्जितां दर्शयितुमयं शब्दः प्रयुक्तः। यतो हि वद धातुः व्यक्तायां वाचि उपदिष्टः। भावहावादौ व्यक्तो न कोऽपि वाक्प्रयोगः। एवञ्चेदस्तु धातूनाम् अनेकार्थत्वादस्य साधुत्वम्। कथं धातवोऽनेकार्थाः ? कथं वा ज्ञायतेऽयं धातुरत्रामुमर्थं द्योतयतीति चेत् धातुपाठे यस्मिन्नर्थे धातव उपदिष्टाः विद्यन्ते ततोऽन्येषु अनेकेष्वर्थेषु प्रयोगस्य दर्शनात्प्रचुरं प्रयुज्यमानः अर्थः धातुपाठे निर्दिष्ट इति सामान्यनिश्चयः। अन्यत्रोपसर्गवशादनेकार्थसिद्धिरिति वक्तव्यम्। नैतेन मन्तव्यं एतेऽर्था उपसर्गगता इति। किन्तु धातोरेवार्थः यमुपसर्गो द्योतयति अथवा प्रकृत्यर्थातिरिक्तः कश्चनोपसर्गगतः स्वार्थः यस्य बलेन धातूनामनेकेष्वर्थेषु प्रवृत्तिरिति बोद्धव्यम्। अन्यान्यपि धातूनामनेकार्थत्वे कारणानि सन्ति। ते च शास्त्रीयाः विषयाः। इदानीं तु प्रकृतमनुसरामः।

राघवाणां विशिष्य रामस्य गुणगणनावर्णनं कुर्वता वाल्मीकिना पुरुषोत्तमलक्षणानि प्रत्येकमुद्धृतानि। वस्तुतः समस्तमपि रामायणं सर्वगुणाढ्यं कञ्चन पुरुषोत्तमं प्रदर्शयितुं प्रयतते येन जनाः सत्पथं यायासुः। अत एव कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्। धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः। इत्येवं प्रश्नमुखेनैवैतत्काव्यं प्रारभत। समस्तमपि रामायणं तस्यैव प्रश्नस्योत्तररूपं दृश्यते। यद्यपि तेषां गुणानां साकल्येन वर्णनमस्य लेखस्य न लक्ष्यम्। तथापि पाठका वयं गुणानुकीर्तनेन अस्मास्वपि गुणानाधातुं समर्था भविष्याम इति धिया पूर्वतनेषु प्रश्नमुखेषु श्लोकेषु स्थितानां गुणानां द्वित्रानुदाहरणानुद्धरिष्यामो रामायणात्।

**गुणवान् रामः।** पूर्वाभिभाषी रामः। नह्यस्माभिः प्रतिग्राह्यं सखे देयं तु सर्वदेति पित्रा वयमनुनीता इति गुहं वदता परम्परयानुवर्तमानं दानशीलत्वं व्यक्तम्। कृतेनैकेनोपकारेण परितुष्यति। न स्मरत्यपकाराणां शतमप्यात्मवत्तया। शत्रुपक्षमपि शरणागतमवति यथा विभीषणम्। अपवादग्रस्तमात्मानमपि त्यजति। यथा सीताम्। भार्या पुत्रः स्वका तनुः इति स्मृतिवचनादेवमुक्तम्। कालेन सह संवदमानः प्रतिज्ञाभङ्गं कुर्वन्तं लक्ष्मणमहासीत्। गाम्भीर्यं धैर्यं वीर्यं प्रियदर्शनत्वं त्यागशीलता सत्यनिष्ठा इत्येवमादयो रामस्य गुणाः। **वीर्यवान् रामः।** ऋषीणां यज्ञविघ्नकरान् ताटकादीन् निजघान। माहेशचापं बभञ्ज। परशुरामगर्वं निराचकार। लङ्कायां राक्षसवनदावानलो रावणं हत्वा सीतां स्वात्मसाच्चकार। अयेऽत्र विषयान्तरमनुधावति मे मनः। कोऽयमन्यो विषयः। श्रूयताम्। बाल्ये एव विश्वामित्रोपहितो रामः ताटकामवधीत्। ततो यज्ञविघ्नकरान् राक्षसानहन्। बहुकृत्वः क्षत्रियसंहारकारणं सर्वलोकभयङ्करं साक्षान्महेश्वरशिष्यं परशुरामं निरजैषीत्। वनवासकाले बहुविधैः घोरैः खरदूषणप्रभृतिभिः मारीचादिभिर्दैत्यैर्मायाविभिः युध्यन् सर्वेष्वपि युद्धतन्त्रेषु कौटिल्येषु छलेषु मायावृत्तेषु च नैपुण्यमानर्ज। बाल्य एव वयसि वनाद्वनं गच्छन्वन्यैः जीवनवृत्तैः सुपरिचितोऽभूत्। सर्वमेतत् पूर्वसन्नाह इव प्रावर्तत। किं वदति भवान् ? येन रावणवधरूपेण परमलक्ष्येण भगवतोऽवतारस्तं लक्ष्यं साधयितुं यद्यदपेक्षितं शरीरेण मनसा विद्यया वा तत्सर्वं कालः बहुमुखेन मार्गेण रामाय समये समये प्रादात्। राममध्यजीगपत्। यदि वयं कुशाग्रया बुद्ध्या पर्यालोचयामस्तर्हि अस्माकमपि जीवनेषु प्रायश एवंविधस्य प्रकृतिकल्पितस्य विधिविहितस्य पूर्वसन्नाहस्य प्रवृत्तिरवलोकयितुं शक्या। तदास्तां प्रकृतमनुसरामः। रामस्य पुरुषोत्तमलक्षणवर्णनं प्रकृतम्। राघवे वीर्येण शङ्कितः सुग्रीवः राघवप्रत्ययार्थं महापर्वतसन्निभं दुन्दुभेः कायं दर्शयामास। महाबलो रामस्तत्पादाङ्गुष्ठेन सम्पूर्णं दश योजनं चिक्षेप। पुनश्च

सप्त तालवृक्षानेकेन महेषुणा गिरिं रसातलं चैव प्रत्ययं जनयन् विभेद। **धर्मज्ञो रामः।** धर्मेण पित्रोः सविधेऽवर्तत। पितुरादेशानुसारं महर्षिं विश्वामित्रमन्वगात्। अनुजेषु स्निग्धः। मातृ़णां वत्सलः। गुरूणां प्रियङ्करः। प्रजावत्सलः। रावणवधानन्तरं लङ्कायां राक्षसेन्द्रं विभीषणमभिषिक्तवान्। प्रत्यागम्य रामः सीतामनुप्राप्य राज्यं समालेभे। **कृतज्ञो रामः।** युद्धाय सन्नतान् सुग्रीवादीनानर्च। रावणं हत्वा लङ्कां विभीषणाय प्रादात् यथा वै बालिनं हत्वा किष्किन्धां सुग्रीवाय प्रहितवान्। निष्कण्टकञ्च वनं तापसेभ्यः। पुष्पकं कुबेराय प्रहितवान्। वानरेभ्य उपायनान् दत्तवान्। पितुर्मित्रं गृध्रं जटायुषं निहतं दृष्ट्वा मैथिलीविरहातुरोऽपि तं दग्ध्वोदकक्रियां विहितवान्। **सत्यवाक् रामः।** यज्ञरक्षां प्रतिश्रुत्य निवर्तितवान्। बालिनिग्रहं प्रतिज्ञाय कृतवान्। पितृवाक्यं पर्यपालयत्। विभीषणायाभयं प्रादात्। सुग्रीववचनाद्रामेण बालिवधं प्रतिज्ञाय ततो बालिनञ्चाहवे हत्वा सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत्। **दृढव्रतो रामः।** चतुर्दश समाः पितुराज्ञया वनमध्युवास। क्लेशैः दन्द्रम्यमाणः स्वतेजसा राज्यावाप्त्यै शक्तोऽपि न तथा चकार। सीताविरहेऽपि न कामप्यन्यां कामयाञ्चकार। मनसा वाचा कर्मणा अधर्मं न चचार। **चारित्रेण युक्तो रामः।** विगतकल्मषा सीतेति जानन्नपि राज्ञामनुकरणीयं प्रजानिमित्तं सच्चरितमाहर्तुकामः सीतास्वीकरणे विमनाः अवर्तत। ततोऽग्निवचनात्सीतां विगतकल्मषां ज्ञात्वा स्वीचकार। **सर्वभूतेषु हितो रामः।** सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः। सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः। इत्यादिरामायणपद्यमिह लक्ष्यताम्। **विद्वान् रामः।** वेदवेदाङ्गतत्वज्ञो धनुर्वेदे च निष्ठितः। सर्वशास्त्रार्थतत्वज्ञः स्मृतिमान् प्रतिभानवान्। इत्यादिरामायणपद्यमिह लक्ष्यताम्। **समर्थो रामः।** विराधं हत्वा अगस्त्यवचनादैन्द्रं शरासनं खड्गं तूणी अक्षयौ सायकौ च जग्राह। असुररक्षसां वधार्थं राममभ्यागतेभ्यो ऋषिभ्यस्तत्प्रतिज्ञाय रक्षांसि निजघान। दण्डकारण्यवासिनां परिरक्षणं कुर्वता जनस्थाननिवासिनी शूर्पणखा विरूपिता। शूर्पणखावाक्यादुद्युक्तान् खरं त्रिशिरसं दूषणं तेषां पदानुगाँश्चैव चतुर्दश सहस्राणि रणे रामो निजघान। कबन्धं नाम रूपेण विकृतं घोरदर्शनं निहत्य ददाह यश्च स्वर्गतः। समुद्रवचनाच्चैव नलं सेतुमकारयत्। तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे सीतामाददे। **प्रियदर्शनो रामः।** विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः। महोरस्को महेष्वासो गूढजत्रुररिन्दमः। इत्यादिभिः श्लोकैः रामस्य प्रियदर्शनत्वमाख्यातम्। **आत्मवान् रामः।** आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः। स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः। इत्येवमादिभिस्तद्वर्णितम्। **जितक्रोधो रामः।** कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः। इत्येवं रामस्य जितक्रोधत्वं वर्णितम्। **द्युतिमान् रामः।** गाम्भीर्यं धैर्यं वीर्यं प्रियदर्शनत्वमित्यादि सर्वमत्र द्रष्टव्यम्। **अनसूयको रामः।** स जगाम वनं वीरः प्रतिज्ञामनुपालयन्। पितुर्वचननिर्देशात्कैकेय्याः प्रियकारणात्। इत्येवादिभी रामस्यानसूयकत्वं सूचितम्। **संयुगे जातरोषस्य अस्य देवाश्च बिभ्यति।** समुद्रतरणाय सपदि मार्गान्तरमपश्यन् क्रुद्धः कालाग्निसदृशः शरैरादित्यसन्निभैस्समुद्रं क्षोभयामास। समुद्रश्च सरितां पतिरात्मानं दर्शयामास।

एवमेते रामादयो वंशकराः। तत्र रामादनन्तरवर्तिनां वंशानुकथनावसरे देवानीकस्य पुत्रमहीनगुमाविष्करोति - वशी सुतस्तस्य वशंवदत्वात्स्वेषामिवासीद् द्विषतामपीष्टः। सकृद्विविग्नानपि हि प्रयुक्तं माधुर्यमीष्टे हरिणान् ग्रहीतुम्।। (रघुवंशम् 18.13)। तस्य देवानीकस्य वशी समर्थः सुतोऽहीनगुर्नामा आत्मीयानामिव शत्रूणामपि इष्ट आसीत्। तत्र कारणमस्य वशंवदत्वं भवति। वशं वशकरं मधुरं वदतीति वशंवदः। 'प्रियवशेवदः खच्' (3.2.38) इति खच्प्रत्ययः। इष्टवादित्वात्स्वेषामिव द्विषतामपीष्टः प्रिय आसीत्। तथा हि प्रयुक्तमुच्चारितं माधुर्यं सकृदेकवारं विविग्नान्भीतानपि हरिणान्ग्रहीतुं वशीकर्तुमीष्टे शक्नोतीति तदर्थं वर्णयति मल्लिनाथः।

नृपेऽनुरूपे निजरूपसम्पदां दिदेश तस्मिन् बहुशः श्रुतिं गते। विशिष्य सा भीमनरेन्द्रनन्दना मनोभवाज्ञैकवशंवदं मनः।। (नैषधम् 1.33)। सा भीमनरेन्द्रस्य नन्दना दमयन्ती तस्मिन्नृपे नले मनो विशिष्य अन्यस्त्रीभ्यः सकाशादतिशयेन अन्यनृपेभ्य आकृष्य वा दिदेश निदधौ। किंभूते नृपे ? निजरूपसम्पदां = स्वकीयसौन्दर्याधिक्यानामनुरूपे = योग्ये। तथा बहुशः = अनेकवारं श्रुतिं श्रवणगोचरं गते = प्राप्ते। किंभूतं मनः ? मनोभवस्य कामस्य आज्ञायाम् एकं = मुख्यं वशंवदं = प्रवणम्। कामाज्ञाकारकमित्यर्थः। मदनायत्तत्वन्नल एव संलग्नमित्यर्थः। वशंवदमित्यत्र प्राग्वत् 'प्रियवशेवदः खच्' (3.2.38) इति खच्प्रत्ययः। 'अरुर्द्विषदजन्तस्य मुम्' (6.3.67) इति मुमागमः। अग्रिमलेखेषु खच्प्रत्ययान्ता अन्ये शब्दाः प्रस्तोष्यन्ते।